श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमन्निगमान्तमहादेशिकैरनुगृहीतम्

# ॥ श्रीमद् रहस्यत्रयसारम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीमद् रहस्यत्रयसारम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

## श्रीगुरुपरंपरासारम्

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे।
वृणीमहे च तत्राद्यौ दंपती जगतां पती॥ १ ॥

एते मह्यमपोढमन्मथशरोन्माथाय नाथादयः
त्रय्यन्तप्रतिनन्दनीयविविधोदन्ताः स्वदन्तामिह।
श्रद्धातव्यशरण्यदम्पतिदयादिव्यापगाव्यापकाः
स्पर्धाविप्लवविप्रलम्भपदवीवैदेशिका देशिकाः॥ २ ॥

हृद्या हृत्पद्मसिंहासनरसिकहयग्रीवहेषोर्मिघोष-
क्षिप्तप्रत्यर्थिदृप्तिर्जयति बहुगुणा पङ्क्तिरस्मद्गुरूणाम्।
दिक्सौधाबद्धजैत्रध्वजपटपवनस्फातिनिर्धूततत्त-
त्सिद्धान्तस्तोमतूलस्तबकविगमनव्यक्तसद्वर्तनीका॥ ३ ॥

## 1 - उपोद्घाताधिकारः

आभगवत्तः प्रथितामनघामाचार्यसन्ततिं वन्दे।
मनसि मम यत्प्रसादाद्वसति रहस्यत्रयस्य सारोऽयम्॥ ४ ॥

कर्मब्रह्मात्मके शास्त्रे कौतस्कुतनिवर्तकान्।
वन्दे हस्तिगिरीशस्य वीथीशोधककिङ्करान्॥ ५ ॥

मणिवर इव शौरेर्नित्यहृद्योऽपि जीवः
कलुषमतिरविन्दन् किङ्करत्वाधिराज्यम्।

विधिपरिणतिभेदात् वीक्षितस्तेन काले
गुरुपरिषदुपज्ञं प्राप्य गोपायति स्वम्॥ ६ ॥

कर्माविद्यादिचक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे
तत्तत्काले विपक्तिर्भवति हि विविधा सर्वसिद्धान्तसिद्धा।
तल्लब्धस्वावकाशप्रथमगुरुकृपागृह्यमाणः कदाचित्
मुक्तैश्वर्यान्तसंपन्निधिरपि भविता कश्चिदित्थं विपश्चित्॥ ७ ॥

## 2 - सारनिष्कर्षाधिकारः

श्रुतिपथविपरीतं क्ष्वेलकल्पं श्रुतौ च
प्रकृतिपुरुषभोगप्रापकांशो न पथ्यः।
तदिह विबुधगुप्तं मृत्युभीता विचिन्वन्ति
उपनिषदमृताब्धेरुत्तमं सारमार्याः॥ ८ ॥

शाखानामुपरि स्थितेन मनुना मूलेन लब्धात्मकः
सत्ताहेतुसकृज्जपेन सकलं कालं द्वयेन क्षिपन्।
वेदोत्तंसविहारसारथिदयागुम्भेन विस्रम्भितः
सारज्ञो यदि कश्चिदस्ति भुवने नाथः स यूथस्य नः॥ ९ ॥

## 3 - प्रधानप्रतितन्त्राधिकारः

आधेयत्वप्रभृतिनियमैरादिकर्तुः शरीरं
सत्तास्थेमप्रयतनफलेष्वेतदायत्तमेतत्।
विश्वं पश्यन्निति भगवति व्यापकादर्शदृष्टे
गम्भीराणामकृतकगिरां गाहते चित्तवृत्तिम्॥ १० ॥

यद्योतं यतिसार्वभौमकथितं विद्यादविद्यातमः
प्रत्यूषं प्रतितन्त्रमन्तिमयुगे कश्चिद्विपश्चित्तमः।
तत्रैकत्र झटित्युपैति विलयं तत्तन्मतस्थापना-
हेवाकप्रथमानहैतुककथाकल्लोलकोलाहलः॥ ११ ॥

## 4 - अर्थपञ्चकाधिकारः

आदौ प्राप्यं परममनघं प्राप्तृरूपं च मादौ
इष्टोपायं त्वयनममसोरीप्सितार्थं चतुर्थ्याम्।
तद्व्याघातं ममकृतिगिरि व्यञ्जयन्तं मनुं तं
तत्प्रायं च द्वयमपि विदन् संमतः सर्ववेदी॥ १२ ॥

प्राप्यं ब्रह्म समस्तशेषि परमं प्राप्ताऽहमस्योचितः
प्राप्तिर्दायधनक्रमादिह मम प्राप्ता स्वतः सूरिवत्।
हन्तैनामतिवृत्तवानहमहंमत्या विमत्याश्रयः
सेतुः संप्रति शेषिदम्पतिभरन्यासस्तु मे शिष्यते॥ १३ ॥

## 5 - तत्त्वत्रयाधिकारः

प्रकृत्यात्मभ्रान्तिर्गलति चिदचिल्लक्षणधिया
तथा जीवेशैक्यप्रभृतिकलहस्तद्विभजनात्।
अतो भोक्ता भोग्यं तदुभयनियन्तेति निगमैः
विभक्तं नस्तत्त्वत्रयमुपदिशन्त्यक्षतधियः॥ १४ ॥

आवापोद्वापतः स्युः कति कति कविधीचित्रवत् तत्तदर्थे-
ष्वानन्त्यादस्तिनास्त्योरनवधिकुहनायुक्तिकान्ताः कृतान्ताः।
तत्त्वालोकस्तु लोप्तुं प्रभवति सहसा निस्समस्तान् समस्तान्
पुंस्त्वे तत्त्वेन दृष्टे पुनरपि न खलु प्राणिता स्थाणुतादिः॥ १५ ॥

## 6 - परदेवतापारमार्थ्याधिकारः

आत्मैक्यं देवतैक्यं त्रिकसमधिगता तुल्यतैक्यं त्रयाणां
अन्यत्रैश्वर्यमित्याद्यनिपुणफणितीराद्रियन्ते न सन्तः।
त्रय्यन्तैरेककण्ठैः तदनुगुणमनुव्यासमुख्योक्तिभिश्च
श्रीमान् नारायणो नः पतिरखिलतनुः मुक्तिदो मुक्तभोग्यः॥ १६ ॥

जनपदभुवनादिस्थानजैत्रासनस्थेषु
अनुगतनिजवार्तं नश्वरेष्वीश्वरेषु।

परिचितनिगमान्तः पश्यति श्रीसहायं
    जगति गतिमविद्यादन्तुरे जन्तुरेकः॥ १७ ॥

## 7 - मुमुक्षुत्वाधिकारः

कालावर्तान् प्रकृतिविकृतीः कामभोगेषु दोषान्
    ज्वालागर्तप्रतिमदुरितोदर्कदुःखानुभूतिम्।
याथातथ्यं स्वपरनियतं यच्च दिव्यं पदं तत्
    काराकल्पं वपुरपि विदन् कस्तितिक्षेत बन्धम्॥ १८ ॥

विषमधु बहिष्कुर्वन् धीरो बहिर्विषयात्मकं
    परिमितरसस्वात्मप्राप्तिप्रयासपराङ्मुखः।
निरवधिमहानन्दब्रह्मानुभूतिकुतूहली
    जगति भविता दैवात् कश्चिज्जिहासितसंसृतिः॥ १९ ॥

## 8 - अधिकारिविभागाधिकारः

मुमुक्षुत्वे तुल्ये सति च मधुविद्यादिषु यथा
    व्यवस्था संसिद्ध्यत्यधिकृतिविशेषेण विदुषाम्।
विकल्प्येत न्यासे स्थितिरितरविद्यासु च तथा
    नियत्या वैयात्यं नियमयितुमेवं प्रभवति॥ २० ॥

प्रपन्नादन्येषां न दिशति मुकुन्दो निजपदं
    प्रपन्नश्च द्वेधा सुचरितपरीपाकभिदया।
विलम्बेन प्राप्तिर्भजनसुखमेकस्य विपुलं
    परस्याशु प्राप्तिः परिमितरसा जीवितदशा॥ २१ ॥

## 9 - उपायविभागाधिकारः

उपायः स्वप्राप्तेरुपनिषदधीतः स भगवान्
    प्रसत्त्यै तस्योक्ते प्रपदननिदिध्यासनगती।

तदारोहः पुंसः सुकृतपरिपाकेण महता
    निदानं तत्रापि स्वयमखिलनिर्माणनिपुणः॥ २२ ॥

कर्म ज्ञानमुपासनं च शरणव्रज्येति चावस्थितान्
    सन्मार्गानपवर्गसाधनविधौ सद्वारकाद्वारकान्।
एकद्व्याकृतियोगसंभृतपृथग्भावानुभावानिमान्
    सम्यक् प्रेक्ष्य शरण्यसारथिगिरामन्ते रमन्ते बुधाः॥ २३ ॥

## 10 - प्रपत्तियोग्याधिकारः

अर्थित्वेन समर्थता त्रिकतनुः संपिण्डिताधिक्रिया
    सा चाष्टाङ्गषडङ्गयोगनियतावस्था व्यवस्थापिता।
श्रौती सर्वशरण्यता भगवतः स्मृत्याऽपि सत्यापिता
    सत्यादिष्विव नैगमेष्वधिकृतिः सर्वास्पदे सत्पथे॥ २४ ॥

भक्त्यादौ शक्त्यभावः प्रमितिरहितता शास्त्रतः पर्युदासः
    कालक्षेपाक्षमत्वं त्विति नियतिवशादापतद्भिश्चतुर्भिः।
एकद्वित्र्यादियोगव्यतिभिदुरनिजाधिक्रियाः संश्रयन्ते
    सन्तः श्रीशं स्वतन्त्रप्रपदनविधिना मुक्तये निर्विशङ्काः॥ २५ ॥

## 11 - परिकरविभागाधिकारः

इयानित्थंभूतः सकृदयमवश्यंभवनवान्
    दयादिव्याम्भोधौ जगदखिलमन्तर्यमयति।
भवध्वंसोद्युक्ते भगवति भरन्यासवपुषः
    प्रपत्तेरादिष्टः परिकरविशेषः श्रुतिमुखैः॥ २६ ॥

प्रख्यातः पञ्चषाङ्गः सकृदिति भगवच्छासनैरेष योगः
    तत्र द्वाभ्यामपायाद्विरतिरनितरोपायतैकेन बोद्धया।
एकेन स्वान्तदार्ढ्यं निजभरविषयेऽन्येन तत्साध्यतेच्छा
    तत्त्वज्ञानप्रयुक्ता त्विह सपरिकरे तादधीन्यादिबुद्धिः॥ २७ ॥

## 12 - साङ्गप्रपदनाधिकारः

अभीष्टे दुस्साधे स्वत इतरतो वा क्वचन तत्
भरन्यासं याञ्चान्वितमभिवदन्ति प्रपदनम्।
इतः पश्चादस्मद्यतननिरपेक्षेण भवता
समर्थ्योऽसावर्थस्त्विति मतिविशेषं तदविदुः॥ २८ ॥

युग्यस्यन्दनसारथिक्रमवति त्रय्यन्तसन्दर्शिते
तत्त्वानां त्रितये यथार्ह विविधव्यापार सन्तानिनि।
हेतुत्वं त्रिषु कर्तृभाव उभयोः स्वाधीनतैकत्र तत्
स्वामिस्वीकृतयद्भरोऽयमलसस्तत्र स्वयं निर्भरः॥ २९ ॥

## 13 - कृतकृत्याधिकारः

समर्थे सर्वज्ञे सहजसुहृदि स्वीकृतभरे
यदर्थं कर्तव्यं न पुनरिह यत्किञ्चिदपि नः।
नियच्छन्तस्तस्मिन् निरुपधिमहानन्दजलधौ
कृतार्थीकुर्मः स्वं कृपणमपि कैङ्कर्यधनिनः॥ ३० ॥

भगवति हरौ पारं गन्तुं भरन्यसनं कृतं
परिमितसुखप्राप्त्यै कृत्यं प्रहीणमकृत्यवत्।
भवति च वपुर्वृत्तिः पूर्वं कृतैर्नियतक्रमा
परमिह विभोराज्ञासेतुर्बुधैरनुपाल्यते॥ ३१ ॥

## 14 - स्वनिष्ठाभिज्ञाधिकारः

स्वरूपोपायार्थेष्ववितथनिविष्टस्थिरमतेः
स्वनिष्ठाभिज्ञानं सुभगमपवर्गादुपनतात्।
प्रथिम्ना यस्यादौ प्रभवति विनीतः स्थगयितुं
गभीरान् दुष्पूरान् गगनमहतश्छिद्रनिवहान्॥ ३२ ॥

स्वापोद्बोधव्यतिकरनिभे भोगमोक्षान्तराले
कालं कञ्चिज्जगति विधिना केनचित् स्थाप्यमानाः।

तत्त्वोपायप्रभृतिविषये स्वामिदत्तं स्वनिष्ठां
    शेषां कृत्वा शिरसि कृतिनः शेषमायुर्नयन्ति॥ ३३ ॥

## 15 - उत्तरकृत्याधिकारः

सन्तोषार्थं विमृशति मुहुः सद्भिरध्यात्मविद्यां
    नित्यं ब्रूते निशमयति च स्वादुसुव्याहृतानि।
अङ्गीकुर्वन्ननघललितां वृत्तिमोदेहपातात्
    दृष्टादृष्टस्वभरविगमे दत्तदृष्टिः प्रपन्नः॥ ३४ ॥

प्रणयिनमिव प्राप्तं पश्चात् प्रिया स्वसमन्वितं
    महति मुहुरामृष्टे दृष्ट्वा मनौ मणिदर्पणे।
प्रपदनधनाः सन्तः शुद्धैः प्रभुं परिभुञ्जते
    प्रसृमरमहामोदस्मेरप्रसूनसमैः क्रमैः॥ ३५ ॥

## 16 - पुरुषार्थकाष्ठाधिकारः

स्वतन्त्रस्वामित्वात् स्वबहुमतिपात्रेषु नियतं
    श्रियः कान्तो देवः स खलु विनियुङ्क्ते चिदचितौ।
यथालोकाम्नायं यतिपतिमुखैराहितधियां
    ततो नः कैङ्कर्यं तदभिमतपर्यन्तमभवत्॥ ३६ ॥

नाथे नस्तृणमन्यदन्यदपि वा तन्नाभिनालीकिनी-
    नालीकस्पृहणीयसौरभमुचा वाचा न याचामहे।
शुद्धानां तु लभेमहि स्थिरधियां शुद्धान्तसिद्धान्तिनां
    मुक्तैश्वर्यदिनप्रभातसमयासत्तिं प्रसत्तिं मुहुः॥ ३७ ॥

## 17 - शास्त्रीयनियमनाधिकारः

मुकुन्दे निक्षिप्य स्वभरमनघो मुक्तवदसौ
    स्वतन्त्राज्ञासिद्धां स्वयमविदितस्वामिहृदयः।

परित्यागे सद्यः स्वपरविविधानर्थजननात्
अलङ्घ्यामामोक्षादनुसरति शास्त्रीयसरणिम्॥ ३८ ॥

श्रुतिस्मृत्याचारैः स्वमतिगतिभिः शुद्धमनसां
सुसङ्कल्पैः धर्म्यैः कुलचरणदेशादिसमयैः।
नियोगैर्योग्यानां नियमयितुरादेरभिमतं
निर्मित्तस्वप्नाद्यैरपि निपुणमन्विच्छति बुधः॥ ३९ ॥

## 18 - अपराधपरिहाराधिकारः

स्वच्छस्वादुसदावदातसुभगां दैवादयं देहभृत्
मालिन्यप्रशमाय माधवदयामन्दाकिनीं विन्दति।
यद्यप्येवमसावसारविषयस्रोतःप्रसूतैः पुनः
पङ्कैरेव कलङ्कयन् निजतनुं प्राज्ञैर्न संश्लिष्यते॥ ४० ॥

प्रारब्धेतरपूर्वपापमखिलं प्रामादिकं चोत्तरं
न्यासेन क्षपयन्ननभ्युपगतप्रारब्धखण्डं च नः।
धीपूर्वोत्तरपाप्मनामजननाज्जातेऽपि तन्निष्कृतेः
कौटिल्ये सति शिक्षयाऽप्यनघयन् क्रोडीकरोति प्रभुः॥ ४१ ॥

## 19 - स्थानविशेषाधिकारः

यत्रैकाग्र्यं भवति भगवत्पादसेवार्चनादेः
यत्रैकान्त्यव्यवसितधियो यस्यकस्यापि लाभः।
वासस्थानं तदिह कृतिनां भाति वैकुण्ठकल्पं
प्रायो देशा मुनिभिरुदिताः प्रायिकौचित्यवन्तः॥ ४२ ॥

सा काशीति न चाकशीति भुवि साऽयोध्येति नाध्यास्यते
साऽवन्तीति न कल्मषादवति सा काञ्चीति नोदञ्चति।
धत्ते सा मधुरेति नोत्तमधुरां नान्याऽपि मान्या पुरी
या वैकुण्ठकथासुधारसभुजां रोचेत नो चेतसे॥ ४३ ॥

## 20 - निर्णयाधिकारः

मनसि करणग्रामं प्राणे मनः पुरुषे च तं
झटिति घटयन् भूतेष्वेनं परे च तमात्मनि।
स्वविदविदुषोरित्थं साधारणे सरणेर्मुखैः
नयति परतो नाडीभेदैर्यथोचितमीश्वरः॥ ४४ ॥

दहरकुहरे देवस्तिष्ठन् निषद्वरदीर्घिका-
निपतितनिजापत्यादित्सावतीर्णपितृक्रमात्।
धमनिमिह नस्तस्मिन् काले स एव शताधिका-
मकृतकपुरप्रस्थानार्थं प्रवेशयति प्रभुः॥ ४५ ॥

## 21 - गतिचिन्तनाधिकारः

ज्वलनदिवसज्योत्स्नापक्षोत्तरायणवत्सरान्
पवनतपनप्रालेयांशून् क्रमादचिरद्युतिम्।
जलधरपतिं देवाधीशं प्रजापतिमागतः
तरति विरजां दूरे वाचस्ततः परमद्भुतम्॥ ४६ ॥

पितृपथघटीयन्त्रारोहावरोहपरिभ्रमैः
निरयपदवीयातायातक्रमैश्च निरन्तरैः।
अधिगतपरिश्रान्तीनाज्ञाधरैरतिवाह्य नः
सुखयति निजच्छायादायी स्वयं हरिचन्दनः॥ ४७ ॥

## 22 - परिपूर्णब्रह्मानुभवाधिकारः

वितमसि पदे लक्ष्मीकान्तं विचित्रविभूतिकं
सचिवगमितः संपद्याविर्भवत्सहजाकृतिः।
स्फुटतदपृथक्सिद्धिः सिद्ध्यद्गुणाष्टकतत्फलो
भजति परमं साम्यं भोगे निवृत्तिकथोज्झितम्॥ ४८ ॥

अविश्रान्तश्रद्धाशतकलहकल्लोलकलुषाः
ममाविर्भूयासुर्मनसि मुनिसिद्धादिसुलभाः।

मधुक्षीरन्यायस्वगुणविभवासञ्जनकन-
न्महानन्दब्रह्मानुभवपरिवाहा बहुविधाः॥ ४९ ॥

संदृष्टः सारवाग्वित् स्वपरनिशितधीः सङ्गजिन्नैकसंस्थः
स्पष्टोपायोऽतिखिन्नः सपरिकरभरन्यासनिष्पन्नकृत्यः।
स्वावस्थार्हं सपर्याविधिमिह नियतं व्यागसं क्वापि बिभ्रत्
निर्मुक्तस्थूलसूक्ष्मप्रकृतिरनुभवत्यच्युतं नित्यमेकः॥ ५० ॥

## 23 - सिद्धोपायशोधनाधिकारः

युगपदखिलं प्रत्यक्षेण स्वतः सततं विदन्
निरवधिदयादिव्योदन्वानशक्यविवर्जितः।
जलधिसुतया सार्धं देवो जगत् परिपालयन्
परमपुरुषः सिद्धोपायः प्रतीष्टभरः सताम्॥ ५१ ॥

विश्राम्यद्भिरुपर्युपर्यपि दिवानक्तं बहिर्दर्शनैः
अस्मद्देशिकसंप्रदायरहितैरद्यापि नालक्षितः।
स्वप्राप्तेः स्वयमेव साधनतया जोघुष्यमाणः श्रुतौ
सत्त्वस्थेषु भजेत सन्निधिमसौ शान्तावधिः शेवधिः॥ ५२ ॥

## 24 - साध्योपायशोधनाधिकारः

यथाधिकरणं प्रभुर्यजनदानहोमार्चना-
भरन्यसनभावनाप्रभृतिभिः समाराधितः।
फलं दिशति देहिनामिति हि संप्रदायस्थितिः
श्रुतिस्मृतिगुरूक्तिभिर्नयवतीभिराभाति नः॥ ५३ ॥

तत्तद्धैतुकहेतुके कृतधियस्तर्केन्द्रजालक्रमे
बिभ्राणाः कथकप्रधानगणने निष्ठां कनिष्ठाश्रयाम्।
अध्यात्मश्रुतिसंप्रदायकतकैरद्धा विशुद्धाशयाः
सिद्धोपायवशीक्रियामिति हि नः साध्यां समध्यापयन्॥ ५४ ॥

## 25 - प्रभावव्यवस्थाधिकारः

स्वरूपं यद्यादृग्गुणविभवलीलादि च विभोः
तदाज्ञासेतुश्च श्रुतिभिरवसेयं तदखिलम्।
तथा तद्भक्तानां तदुपसदनादेश्च महिमा
यथाऽधीतं सद्भिर्यतिपतिमुखैरध्यवसितः॥ ५५ ॥

चातुर्वर्ण्यचतुर्विधाश्रममुखे भेदे यथावस्थिते
वृत्तं तन्नियतं गुणानुगुणया वृत्त्या विशिष्टं श्रिताः।
त्यागोपप्लवनित्यदूरशरणव्रज्याविधौ कोविदाः
चिन्तामभ्युपगन्तुमन्तिमयुगेऽप्येकान्तिनः सन्ति नः॥ ५६ ॥

## 26 - प्रभावरक्षाधिकारः

शिलादेः स्त्रीत्वादिर्विपरिणतिरस्त्वद्भुतमिदं
ततोऽप्येतच्चित्रं यदुत दहनस्यैव हिमता।
तृणस्यैवास्त्रत्वं रिपुषु निहतेरेव हितता
पदत्रेणैवेह त्रिभुवनपरित्राणमिति च॥ ५७ ॥

रागद्वेषमदादिकैरिह महारक्षोभिरक्षोभिते
नित्ये रक्षितरि स्थिते निजभरन्यासाभिधानं तपः।
यत् कक्षीकृतमत्यशेत विविधान् धर्मानधर्मद्रुहः
तद्भूमार्णवलेशवर्णनमपि प्राचां न वाचां पदम्॥ ५८ ॥

## 27 - मूलमन्त्राधिकारः

तारं पूर्वं तदनुहृदयं तच्च नारायणाये-
त्याम्नायोक्तं पदमवयतां सार्थमाचार्यदत्तम्।
अङ्गीकुर्वन्नलसमनसामात्मरक्षाभरं नः
क्षिप्रं देवः क्षिपतु निखिलान् किङ्करैश्वर्यविघ्नान्॥ ५९ ॥

कल्याणमावहतु कार्तयुगं स्वधर्मं
प्रख्यापयन् प्रणिहितेषु नरादिकेषु।

आद्यं कमप्यधिगतो रथमष्टचक्रं
    बन्धुः सतां बदरिकाश्रमतापसो नः॥ ६० ॥

यदन्तस्स्थमशेषेण वाङ्मयं वेदवैदिकम्।
तस्मै व्यापकमुख्याय मन्त्राय महते नमः॥ ६१ ॥

इह मूलमन्त्रसंवृतमर्थमशेषेण कश्चिदनुभवति।
स्फटिकतलनिहितनिधिमिव देशिकदत्तेन चक्षुषा जन्तुः॥ ६२ ॥

इत्थं सङ्घटितः पदैस्त्रिभिरसावेकद्विपञ्चाक्षरैः
    अर्थैस्तत्त्वहितप्रयोजनमयैरध्यात्मसारैस्त्रिभिः।
आद्यस्त्र्यक्षरवेदसूतिरजहत्स्थूलादिवृत्तित्रयः
    त्रैगुण्यप्रशमं प्रयच्छति सतां त्रय्यन्तसारो मनुः॥ ६३ ॥

## 28 - द्वयाधिकारः

आकर्णितो वितनुते कृतकृत्यकक्ष्यां
    आम्रेडितो दिशति यश्च कृतार्थभावम्।
प्रत्यूषतां भजति संसृतिकालरात्रेः
    पद्मासहायशरणागतिमन्त्र एषः॥ ६४ ॥

न वेदान्ताच्छास्त्रं न मधुमथनात् तत्त्वमधिकं
    न तद्भक्तात् तीर्थं न तदभिमतात् सात्त्विकपदम्।
न सत्त्वादारोग्यं न बुधभजनात् बोधजनकं
    न मुक्तेः सौख्यं न द्वयवचनतः क्षेमकरणम्॥ ६५ ॥

## 29 - चरमश्लोकाधिकारः

य उपनिषदामन्ते यस्मादनन्तदयाम्बुधेः
    त्रुटितजनताशोकः श्लोकः स्वयं समजायत।
तमिह विधिना कृष्णं धर्मं प्रपद्य सनातनं
    शमितदुरिताः शङ्कातङ्कत्यजः सुखमास्महे॥ ६६ ॥

दुर्विज्ञानैर्नियमगहनैर्दूरविश्रान्तिदेशैः
बालानर्हैर्बहुभिरयनैः शोचतां नः सुपन्थाः।
निष्प्रत्यूहं निजपदमसौ नेतुकामः स्वभूम्ना
सत्पाथेयं किमपि विदधे सारथिः सर्वनेता॥ ६७ ॥

व्यासाम्नायपयोधिकौस्तुभनिभं हृद्यं हरेरुत्तमं
श्लोकं केचन लोकवेदपदवीविश्वासितार्थं विदुः।
येषामुक्तिषु मुक्तिसौधविशिखासोपानपङ्क्तिष्वमी
वैशम्पायनशौनकप्रभृतयः श्रेष्ठाः शिरःकम्पिनः॥ ६८ ॥

## 30 - आचार्यकृत्याधिकारः

अधिजिगमिषुराद्यं धाम दिव्यं त्रिधाम्नः
श्रुतविविधपरीक्षाशोधिते क्वापि पात्रे।
अनघगुणदशायामाहितस्नेहमार्यः
प्रदिशति निरपायं संप्रदायप्रदीपम्॥ ६९ ॥

निरवधिदयादिव्योदन्वत्तरङ्गनिरङ्कुशैः
नियमयति यः शिष्यान् शिक्षाक्रमैर्गुणसङ्क्रमैः।
अचरमगुरोराज्ञापारंपरीपरवानसौ
न परमिह तांस्तल्लक्षेण स्वमप्यभिरक्षति॥ ७० ॥

## 31 - शिष्यकृत्याधिकारः

अशिथिलगुरुभक्तिस्तत्प्रशंसादिशीलः
प्रचुरबहुमतिस्तद्वस्तुवास्त्वादिकेऽपि।
गुणवति विनियोक्तुं गोपयन् संप्रदायं
कृतविदनघवृत्तिः किं न विन्देन्निधानम्॥ ७१ ॥

अध्यासीनतुरङ्गवक्त्रविलसज्जिह्वाग्रसिंहासनात्
आचार्यादिह देवतां समधिकामन्यां न् मन्यामहे।

यस्यासौ भजते कदाचिदजहद्भूमा स्वयं भूमिकां
मग्नानां भविनां भवार्णवसमुत्ताराय नारायणः॥ ७२ ॥

## 32 - निगमनाधिकारः

करबदरितविश्वः कश्चिदाचार्यदृष्ट्या
मुषितनिखिलमोहो मूलमन्त्रादिभोगः।
सगुणविषयसिद्धौ संप्रदायं प्रयच्छन्
सुचरितसिलहारी सूरिबृन्दाभिनन्द्यः॥ ७३ ॥

इति यतिराजमहानसपरिमळपरिवाहवासितां पिबत।
विबुधपरिषन्निषेव्यां वेदान्तोदयनसंप्रदायसुधाम्॥ ७४ ॥

कलकण्ठगणास्वाद्ये कामस्यास्त्रे निजाङ्कुरे।
निम्बवृत्तिभिरुद्गीर्णे न चूतः परितप्यते॥ ७५ ॥

निर्विष्टं यतिसार्वभौमवचसामावृत्तिभिर्यौवनं
निर्धूतेतरपारतन्त्र्यनिरया नीताः सुखं वासराः।
अङ्गीकृत्य सतां प्रसत्तिमसतां गर्वोऽपि निर्वापितः
शेषायुष्यपि शेषिदम्पतिदयादीक्षामुदीक्षामहे॥ ७६ ॥

आस्तिक्यवान् निशितबुद्धिरनभ्यसूयुः
सत्संप्रदायपरिशुद्धमनाः सदर्थी।
सङ्केतभीतिरहितः सतृणेष्वसक्तः
सद्वर्तनीमनुविधास्यति शाश्वतीं नः॥ ७७ ॥

रहस्यत्रयसारोऽयं वेङ्कटेशविपश्चिता।
शरण्यदम्पतिविदां संमतः समगृह्यत॥ ७८ ॥

॥ इति श्रीमद् रहस्यत्रयसारं संपूर्णम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥